**दिनाङ्क :- 13.08.2025** **प्रात: - 06:55**

**पीएम - सेमीकंडक्टर**

प्रधानमन्त्री श्रीनरेन्द्रमोदी उक्तवान् यत्, भारतं सेमीकंडक्टर-क्षेत्रे तीव्रगत्या प्रगतिम् करोति, अथ च स्वस्य डिजिटलभविष्याय शक्तिं प्रदातुम्, वैश्विकनवाचारं च चालयितुं सुदृढपारिस्थितिकी-तन्त्रस्य निर्माणं कुर्वन् अस्ति। एकस्मिन् सोशल मीडिया-सन्देशे श्रीमोदी प्रावोचत् यत् आन्ध्रप्रदेश-ओडिशा-पञ्जाब-राज्येषु सेमीकंडक्टर परियोजनाया: अनुमोदनसम्बद्धः केन्द्रीयमन्त्रिमण्डलस्य निर्णयः विनिर्माणक्षमतां वर्धयिष्यति, उच्च-कुशल-उद्योगावसराणां सृजनं च करिष्यति, भारतं च वैश्विक-आपूर्ति-शृङ्खलायां प्रमुख-निर्वाहक-रूपेण स्थापयिष्यति। केन्द्रीयमन्त्रिमण्डलेन ह्यः एव ओडिशा, पञ्जाब, आन्ध्रप्रदेशेषु चतस्रः नूतनाः सेमीकंडक्टर परियोजनाः अनुमोदिताः। यस्य अनुमानितव्ययः प्रायः सार्ध-चतुः-सहस्रकोटिरूप्यकाणां भविष्यति। सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः आध्यक्षे मन्त्रिमण्डलेन अयं निर्णयः स्वीकृतः। श्रीवैष्णवः अवदत् यत्, केन्द्रसर्वकारेण उत्तरप्रदेशस्य, लखनऊ-मेट्रो-बी- प्रथमचरणस्यापि अनुमोदनं कृतम्, यस्य अनुमानित-व्ययः एकोत्तर- अष्टशताधिक - पञ्चसहस्रकोटिरूप्यकाणि अस्ति। सः उक्तवान् यत् अस्मिन् मेट्रोरेल्-मार्गे द्वादश स्थानकानि निर्मास्यन्ते अथ एषा परियोजना अग्रिमपञ्चवर्षेषु परिपूर्णतां यास्यति । श्रीवैष्णवः उक्तवान् यत् सप्तशत मेगावाट् क्षमतायाः द्वितीय-तातो-जल-विद्युत्परियोजनायाः कृतेऽपि सर्वकारेण स्वस्वीकृतिः प्रदत्ता। सः अवदत्, अरुणाचलप्रदेशस्य शि-योमी-मण्डले एषा परियोजना निर्मिता भविष्यति, एतस्य निर्माणं षड्वर्षेषु भविष्यति।

**गृहमन्त्रालय: - भारतीय प्रवासी नागरिकाणां**

गृहमन्त्रालयेन ओवरसीस् सिटिजेन्स् आफ् इण्डिया इति भारतीय प्रवासी नागरिकाणां शासनस्य मानदण्डाः कठिनाः कृताः। मन्त्रालयेन उक्तं यत् यदि कश्चन व्यक्तिः वर्षद्वयम्, तदधिकं वा कारावासस्य दण्डं प्राप्नोति, अथवा सप्तवर्षेभ्यः अधिकं वा कारावासस्य दण्डनीयस्य अपराधस्य आरोपपत्रं प्राप्नोति तर्हि ओ.सी.आई. पञ्जीकरण-पत्रस्य अपावर्तनं भविष्यति।

**कृषकाः-सर्वकारः**

विदेशीय-प्रबल-परिस्पन्दस्य मध्येऽपि व्यापार-सन्धिषु सर्वकारस्य साहसिकनिर्णयस्य कृते देशस्य कृषकाः प्रधानमन्त्रिणे नरेन्द्रमोदिने धन्यवादं दत्तवन्तः। कृषकाणां विशालः समूहः, कृषकसङ्घटनस्य नेतारः च, ह्यः नवदिल्लीनगरे, केन्द्रीय-कृषि-कृषक-कल्याण-मन्त्रिणा शिवराजसिंह-चौहान-महोदयेन सह मिलित्वा कृषकहितस्य रक्षणार्थं सर्वकारस्य निर्णायक-कार्याणां कृते कृतज्ञतां समर्थनं च प्रकटितवन्तः।

**भारत-सिङ्गापुर**

इण्डिया-सिंगापुर-मिनिस्ट्रियल-राउण्ड-टेबल इत्यस्य तृतीय-परिक्रमस्य गोलोत्पीठिका-संगोष्ठी अद्य नवदिल्ली-नगरे भविष्यति। अस्यां संगोष्ठ्याम्, केन्द्रीयमन्त्रिणः डॉ. एस्. जयशंकरः, निर्मला सीतारामन् वर्या, श्री-अश्विनी-वैष्णवः, श्रीपीयूष गोयलः च उपस्थिताः भविष्यन्ति। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये सूचितं यत् सिङ्गापुरस्य उपप्रधानमन्त्री गान् किम योङ्गः, विदेशमन्त्री जोसेफिन् तेओ च सहितं सिङ्गापुरदेशस्य अन्ये मन्त्रिणः अस्मिन् सत्रे भागं गृहीष्यन्ति।

**महा- मौसमः**

भारतीय ऋतुविज्ञानविभागेन मुम्बई, ठाणे, रायगड, रत्नागिरी मण्डलेषु येल्लो-अलर्ट इति पीतवर्णीयसंचेतना घोषिता यत्र हि, विदर्भस्य कृते श्वः यावत् ऑरेन्ज अलर्ट संचेतना घोषिता। विभागेन उक्तं यत् मुम्बईनगरे समीपस्थमण्डलेषु च मेघगर्जनेन सह लघुमध्यमवृष्टिः भविष्यति।

**विश्वक्रीडा-वुशुः**

चीनदेशस्य चेङ्गडु इत्यत्र विश्व-क्रीडासु, वुशु-क्रीडायां भारतस्य नम्रता बात्रा इत्यनया क्रीडिकया प्रथमवारं पदकं प्राप्य इतिहासः विनिर्मितः। अवधेयं यत् नम्रता बात्रा अस्याः क्रीडायाः अन्तिमचक्रे रजतपदवीं प्राप्तवती।

**।। इति वार्ता:।।**